# दशमः पाठः
# कारुण्यं रामभद्रस्य

महाकविः भवभूतिः संस्कृतवाङ्मयस्य मूर्धन्यः कविः अस्ति। प्रायः वीरशृङ्गाररसप्रधाने काव्यजगति एकेन भवभूतिना एव करुणं रसं आधृत्य नाटकं रचितम्। भवभूतिः विविधानां पात्राणाम् मनोवैज्ञानिकचित्रणस्य भावोन्मेषस्य, भावानां अन्तर्द्वन्द्वस्य च अप्रतिमः रचयिता अस्ति। यत्र सर्वे कवयः प्रकृत्या सुन्दरं रूपं एव चित्रितवन्तः तत्रैव भवभूतिना प्रकृत्याः भयावहस्वरूपस्यापि स्वाभाविकं, हृदयग्राही च चित्रणं कृतम्। कवेः तिस्रः कृतयः सन्ति मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम् इति। उत्तररामचरितम् कवेः अन्तिमा रचना अस्ति। अस्मिन् करुणो रसः अङ्गीरसः अस्ति। अस्मिन् श्रीरामचन्द्रस्य राज्याभिषेकोपरान्तस्य कथानकः वर्णितः। सीतायाः अपवादः पुनः वनवासः, लवकुशयोः जन्म, शम्बूकस्य वधः, अन्ततः वाल्मीकिआश्रमे समग्रपरिवारजनानां सम्मेलनम् अत्र वर्णितः। अस्य नाटकस्य तिस्रः विशिष्टताः सन्ति प्रथमा- चित्रवीथिदर्शनम् (प्रथमाङ्के), द्वितीया- छायाङ्कं, (तृतीयाङ्के), तृतीया- गर्भाङ्कः (सप्तमाङ्के)।

राज्ञः रामचन्द्रस्य लोकरञ्जकः स्वरूपः, रामराज्यस्य चावधाराणा उत्तररामचरितस्य सारभूतः तत्त्वः अस्ति। भवभूतिना महावीरचरिते, मालतीमाधवे च स्वपरिचयं सङ्केतितः। अस्य पूर्वजाः तैत्तिरीयशाखाध्यायिनः काश्यपगोत्रीयाः ब्राह्मणाः आसन्। जननी जतुकरणी, पिता च नीलकण्ठः आसीत्। भवभूतिः न्याय-मीमांसा-व्याकरणशास्त्राणां मूर्धन्यः विद्वान् आसीत्।

प्रस्तुतः पाठः उत्तरामचरितस्य 'छायाङ्क' इति नाम्ना तृतीयाङ्कात् उद्धृतः। सीतात्यागोपरान्तः रामः शम्बूकवधहेतुना दण्डकारण्ये गच्छति, यत्र स्वप्रियाम् सीताम् स्मृत्वा मर्मभेदी विलापं करोति। सीताऽपि स्वपुत्रयोः कुशलवयोः वर्षग्रन्थौ वाल्मीकि-आश्रमे गच्छति। दण्डकारण्ये रामञ्च पश्यति। गङ्गायाः प्रसादेन अदृश्या सीता रामं स्वशीतलस्पर्शेन पुनः पुनः नवजीवनं ददाति। श्रीरामस्य भावान्, करुण विलापं च श्रुत्वा सा स्वाकारण परित्यागस्य दुःखमपि विस्मृत्य मुक्ता भवति। लोकरञ्जनाय त्यागोपरान्तः रामविषयकः विलापः रामस्य पत्नीव्रतं, सीतां प्रति प्रेमञ्च अभिव्यञ्जति। अत्र भवभूतेः करुणरसः पुनः पुनः दीप्तः।

(ततः प्रविशति नदीद्वयम्)

एका - सखि मुरले, किमसि सम्भ्रान्तेव ?

मुरला - सखि तमसे, प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। जानास्येव यथा वधूपरित्यागात् प्रभृति-

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः।। १।।**

मुरला - तेन च तथाविधेष्टजन-कष्टविनिपातजन्मना प्रकृष्टतां गतेन दीर्घशोकसंतापेन संप्रत्यतितरां परिक्षीणो रामभद्रः। तमवलोक्य कंपितमिव कुसुमसमबन्धनं मे हृदयम्। अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशाः द्रष्टव्याः। तत्र निसर्गधीरस्याप्येवं विधायामवस्थाया-मतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महाप्रमादानि शोकस्थानानि शङ्कनीयानि रामभद्रस्य। तद् भगवति गोदावरी त्वया तत्र-भवत्या सावधानया भवितव्यम्।

**वीचिवातैः शीकरक्षोदशीतै, राकर्षद्भिः पद्मकिंजल्कगन्धान्।**
**मोहे मोहे रामभद्रस्य जीवं, स्वैरं स्वैरं प्रेरितैस्तर्पयेति ।। २।।**

तमसा - उचितमेव दाक्षिण्यं स्नेहस्य। सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य संनिहितः।

मुरला - कथमिव ?

तमसा - तत्सर्वं श्रूयताम्-पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्तप्रसववेदनमतिदुःख संवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती।

तदैव तत्र द्वारकद्वयं च प्रसूता। भगवतीभ्यां भगीरथी-पृथिवीभ्यामस्युपपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण दारकद्वयं च तस्य प्राचेतस्य महर्षे गङ्गादेव्या समर्पितं स्वयम्।

मुरला - (सविस्मयम्)

**ईदृशानां विपाकोऽपि जायते परमाद्भुतः।**
**यत्रोपकरणीभाव-मायात्येवं विधो जनः।। ३।।**

मुरला - अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा - तदियं गोदावरी ह्रदान्निर्गत्य-

**परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।**
**करुणस्य मूर्तिरथवा शरीरिणी, विरहव्यथेव वनमेति जानकी।। ४।।**

मुरला - इयं हि सा-

**किसलयमिव मुग्धं बन्धनाद् विप्रलूनं**
**हृदयकमलशोषी दारुणो दीर्घशोकः।**

**ग्लपयति परिपाण्डु क्षाममस्याः शरीरं**
**शरदिज इव घर्मः केतकीगर्भपत्रम्।। ५।।**

(इति परिक्रम्य निष्क्रान्ते)

**( नेपथ्ये )**

जात ! जात !

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)

सीता – अहो, जानामि प्रियसखी वासन्ती व्याहारतीति।

(पुनर्नेपथ्ये)

**सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै,**
**रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।**

सीता – किं तस्य?

(पुनर्नेपथ्ये)

**वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-**
**दुद्दामेन द्विरदपतिना संनिपत्याभियुक्तः।। ६।।**

सीता – (ससम्भ्रमं कतिचित् पदानि गत्वा) परित्रायस्व परित्रायस्व। मम तं पुत्रकम्। (विचिन्त्य) हा धिक् आर्यपुत्र! हा धिक् ! तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र! (इति मूर्च्छति)

(प्रविश्य)

समाश्वसिहि। समाश्वसिहि।

(नेपथ्ये) विमानराज अत्रैव स्थीयताम्।

सीता – अहो जलभर-भरितमेघमन्थरस्तनित गम्भीरमांसलः कुतोन्वेष भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति।

तमसा – (सस्मितास्रम्) अयि वत्से!

**अपरिस्फुटनिक्वाणे कुतस्त्येऽपि त्वमीदृशी।**
**स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता।। ७।।**

सीता – भगवति! किं भणसि अपरिस्फुटेति? स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रेणैवैतद् व्याहृतम्।

तमसा – वत्से समाश्वसिहि, समाश्वसिहि।

(नेपथ्ये)

अनेन पञ्चवटीदर्शनेन–

**अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।**
**उत्पीडइव धूमस्य मोहः प्रागावृणोति माम्।।८।।**

हा देवि दण्डकारण्यप्रियसखि विदेहराजपुत्रि! (इति मूर्च्छति)

सीता – हा धिक्, हा धिक्, मां मन्दभागिनीं व्याहृत्यामीलित नेत्र–नीलोत्पलो मूर्च्छित एव। हा कथं धरणीपृष्ठे निरूद्ध–निःश्वासनिःसहं विपर्यस्तः? भगवति तमसे परित्रायस्व, परित्रायस्व, जीवयार्यपुत्रम्। (इति पादयोः पतति)

तमसा –

**त्वमेव ननु कल्याणि! संजीवय जगत्पतिम्।**
**प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः।।९।।**

सीता – यद्भवतु तद् भवतु। यथा भगवत्याज्ञापयति।

(ततः प्रविशति भूम्यां निपतितः सास्त्रया सीतया स्पृश्यमानः सोह्लादोच्छ्वासो रामः)

सीता – जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य।

रामः – हन्त भोः, कमेतत् ?

**स्पर्शः पुरा परिचितो नियतं स एव,**
**सञ्जीवनश्च मनसः परितोषणश्च।**
**सन्तापजां सपदि यः परिहृत्य मूर्च्छा–**
**मानन्देनेन जड़तां पुनरातनोति।।१०।।**

सीता – (ससाध्वसकरुणमुपसृत्य) एतावदेदानीं मम् बहुतरम्।

रामः – (उपविश्य) न खलु वत्सलया देव्याऽभ्युपपन्नोऽस्मि?

सीता – हा धिक् , हा धिक् किमित्यार्यपुत्रो मां मार्गिष्यते?

रामः – भवतु, पश्यामि।

सीता – भगवति तमसे अपसराव तावत् मां प्रेक्ष्यानभ्युनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति।

तमसा – अयि वत्से, भगीरथीप्रसादाद् वनदेवतानामप्यदृश्यासि संवृत्ता।

सीता – अस्ति खल्वेतत् ?

रामः – हा प्रिये जानकि !

सीता – आर्यपुत्र, असदृशं खल्वेततस्य वृत्तान्तस्य। (सास्त्रम्) भगवति किमिति व्रजमयी जन्मान्तरेष्वपि पुनरप्यसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवंवादिन–आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि?

अहमेवैतस्य हृदयं जानामि, ममैषः।

राम: – (सर्वतोवलोक्य) (सनिर्वेदम्) हा न किञ्चिदत्र। देवि –

**प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः**
**अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि।। ११।।**

सीता – एते खलु तेऽगाधमानसंदर्शितस्नेहसंभारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः। जाने प्रत्यनेन निष्कारणपरित्याग–शल्यितोऽपि बहुमतो मे जन्मलाभः।

राम: – (सर्वतोऽवलोक्य) हा, कथं नास्त्येव? नन्वकरुणे वैदेहि!

सीता – अकरुणास्मि यैवंविधं त्वां पश्यन्त्येव जीवामि।

राम: – क्वासि प्रिये! देवि! प्रसीद प्रसीद। न मामेवं विधं त्यक्तुमर्हसि। कष्टं भोः

**व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,**
**प्रज्ञा जाम्बवन्तो न यत्र, न गतिः पुत्रस्य वायोरपि।**
**मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः**
**सौमित्रेरपि पत्रिणामविषये तत्र प्रिये! क्वासि मे।।१२।।**

सीता – बहुमानितास्मि पूर्वविरहे।

राम: – दुःखायैव सुहृदामिदानीम् रामदर्शनम्। तदनुजानीहि मां गमनाय।

सीता – (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्रः। किं करोमि? (इति मूर्च्छति)

तमसा – वत्से जानकि! समाश्वसिहि। विधिस्तवानुकूलो भविष्यति। तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः।

राम: – अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।

सीता – (साक्षेपम्) आर्यपुत्रः कः?

वासन्ती – परिणीतमपि किम्?

राम: – नहि, नहि, हिरण्यमयी सीताप्रतिकृतिः।

सीता – (सोच्छ्वासास्रम्) आर्यपुत्र, इदानीमसि त्वम्। अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।

वासन्ती – महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

राम: – तथास्तु।

(सर्वे निष्कान्ताः)

## पद्यानाम् अन्वयः-

१. गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणः रसः पुटपाकप्रतीकाशः।

२. शीकरक्षोदशीतैः पद्मकिंजल्कगंधान् आकर्षद्भिः स्वैरं स्वैरं प्रेरितैः वीचिवातैः रामभद्रस्य मोहे मोहे जीवम् तर्पय इति।

३. ईदृशानां विपाकः अपि परमाद्भुतः जायते। यत्र एवंविधः जनः उपकरणीभावम् आयाति।

४. परिपाण्डुदुर्बलकपोलसुन्दरम् विलोलकबरीकम् आननम् दधती, जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति।

५. हृदयकमलशोषी दारुणः दीर्घशोकः बन्धनात् विप्रलूनम् मुग्धम् किसलयमिव परिपाण्डु क्षामम् अस्याः शरीरं, शरदिजः घर्मः केतकीगर्भपत्रम् इव ग्लपयति।

६. पुरा अग्रे लोलः यः करिकलभकः सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रैः वर्धितः अभूत्। स अयम् वध्वा सार्धम् पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् संनिपत्य अभियुक्तः।

७. स्तनयित्नोः अपरिस्फुटनिक्काणे मयूरी इव त्वम् कुत्स्त्ये अपि ईदृशी चकितोत्कण्ठितं स्थिता।

८. अन्तर्लीनस्य अद्य उद्दामं ज्वलिष्यतः दुःखाग्नेः धूमस्य उत्पीडः इव मोहः माम् प्राक् आवृणोति।

९. कल्याणि! त्वम् एव ननु जगत्पतिम् संजीवय, हि ते पाणिः प्रियस्पर्शः तत्र एष जनः निरतः।

१०. पुरा परिचितः संजीवनः च मनसः परितोषणः च नियतम् स एव स्पर्शः यः सन्तापजां मूर्च्छाम् परिहृत्य सपदि आनन्दनेन पुनः जड़ताम् आतनोति।

११. स्नेहार्द्रशीतलः ते स्पर्शः मूर्तः प्रसादः इव अद्यापि माम् आनन्दयति, नन्दिनि! त्वम् पुनः क्व असि?

१२. यत्र मे कपीन्द्रसख्यम् अपि व्यर्थम्, हरीणाम् वीर्यम् वृथा, यत्र जाम्बवन्तः प्रज्ञा न, वायोः पुत्रस्य अपि यत्र गतिः न, यत्र विश्वकर्मतनयः नलः अपि मार्गम् कर्तुम् न क्षमः, सौमित्रेः अपि पत्रिणाम् अविषये तत्र क्व मे प्रिये असि?

## कठिनः शब्दार्थाः

| | | |
|---|---|---|
| **अनिर्भिन्नो** | – | अविदीर्णः, अव्यक्तः। |
| **गभीरत्वाद्** | – | स्वभावगाम्भीर्यात्, सघनवस्त्रमृत्तिकालेपसंयुक्तत्वात्। |
| **अन्तर्गूढ** | – | अन्तःकरणे गुप्तः। |
| **घनव्यथ** | – | प्रगाढ़ा व्यथा यस्य सः। |
| **पुटपाकप्रतीकाशः** | – | पुटे पात्रे पचनं तेन सदृशः। |
| **प्रकृष्टतां** | – | पराकाष्ठाम् प्राप्ताम्। |
| **परिक्षीणो** | – | अतीव कृशः। |
| **कुसुमसमबन्धनं** | – | कुसुमं इव कोमलं बन्धनम्। |
| **अतिगम्भीराभोग** | – | अति गम्भीरः यः आभोगः विस्तारः (गहरे विस्तार वाले)। |

| | | |
|---|---|---|
| **वीचिवातैः** | – | तरङ्गवायुभिः (लहरों की वायु से)। |
| **शीकरक्षोदशीतैः** | – | जलकणानां क्षोदाः चूर्णाः तैः शीतलाः (जलकणों के बिन्दुओं से शीतल)। |
| **पद्मकिंजल्कगन्धान्** | – | कमलानां केसराः तेषां गन्धान् (कमल-पराग से सुगन्धित)। |
| **स्वैरं-स्वैरं** | – | मन्दं मन्दं (धीरे-धीरे)। |
| **दाक्षिण्यं** | – | औदार्यम् (उदारता)। |
| **सन्निहितः** | – | निकटस्थः (समीप)। |
| **निक्षिप्तवती** | – | समर्पितवती (सीता ने स्वयं को फेंक दिया)। |
| **प्राचेतस्य** | – | वाल्मीकेः (वाल्मीकि के)। |
| **विपाको** | – | विषमः परिणामः। |
| **उपकरणीभावम्** | – | सहायत्वम् प्राप्नोति (सहायता को प्राप्त होती है)। |
| **तर्कयामि** | – | चिन्तयामि (सोचती हूँ)। |
| **परिपाण्डु** | – | अतिशयं पीतवर्णम् (अत्यन्त पीले)। |
| **विलोलकबरीकमाननम्** | – | चञ्चलः केशपाशः यस्मिन् तत् आननम् (चञ्चल, बिखरे बालों वाले मुख को)। |
| **विप्रलूनम्** | – | विच्छिन्नम् (टूटे हुए)। |
| **दारुणो** | – | भयङ्करः, कठोरः। |
| **ग्लपयति** | – | म्लानं करोति (मुर्झा देता है)। |
| **क्षामम्** | – | कृशम्। |
| **घर्मः** | – | आतपः (धूप)। |
| **स्वकरकलितैः** | – | स्वहस्तेन दत्तैः (अपने हाथ से दी गई)। |
| **करिकलभकः** | – | हस्तिशावकः (हाथी का बच्चा)। |
| **सन्निपत्याभियुक्तः** | – | वेगात् समीपम् आगत्य आक्रान्तः (तेजी से पास आकर दबा लिया)। |
| **परित्रायस्व** | – | रक्ष (रक्षा करो)। |
| **समाश्वसिहि** | – | धैर्यं धारयतु (धैर्य धारण करो)। |
| **स्तनितः** | – | गम्भीरः गर्जनः। |
| **निर्घोषो** | – | स्वरः। |
| **अपरिस्फुटनिक्वाणे** | – | अस्पष्टः ध्वनिः तस्मिन्। |
| **प्रागावृणोति** | – | पूर्वं आच्छादयति। |
| **उत्पीडः** | – | राशिः। |
| **विदेहराजपुत्रि** | – | सीता (सम्बोधन)। |
| **नेत्रनीलोत्पलो** | – | नेत्रे एव नीलकमले येन सः। |

| | | |
|---|---|---|
| **धरणीपृष्ठे** | – | पृथिवीतले, भूमौ। |
| **सास्त्रया** | – | अश्रु सहितया। |
| **सोल्हादोच्छ्वासो** | – | आह्लादेन, उच्छ्वासेन च युक्तः। |
| **सन्तापजां** | – | सन्तापेन जनितां, विरहदु:खोत्पन्नाम्। |
| **सपदि** | – | शीघ्रमेव। |
| **परिहृत्य** | – | दूरीकृत्य। |
| **पुनरातनोति** | – | पुनः प्रसारयति। |
| **उपसृत्य** | – | निकटं गत्वा। |
| **मार्गिष्यते** | – | अन्विष्यते (खोजेंगे)। |
| **प्रेक्ष्यानभ्युनुज्ञातेन** | – | प्रेक्ष्य (देखकर) आज्ञया विना (आज्ञा के बिना)। |
| **निरनुक्रोशा** | – | निर्दया। |
| **स्नेहार्द्रशीतलः** | – | स्नेहेन (प्रेम्णा) आर्द्रः स चासौ शीतलः शान्तिप्रदः (प्रेम से आर्द्र और शीतल)। |
| **नन्दिनि** | – | आनन्ददायि सीते (सम्बोधन)। |
| **आनन्दनिष्यन्दिनः** | – | रसवर्षिणः। |
| **उल्लापाः** | – | विलापाः। |
| **कपीन्द्रसख्यम्** | – | वानराणाम् इन्द्रः कपीन्द्रः सुग्रीवः तेन मित्रता (सुग्रीव की मित्रता)। |
| **हरीणां** | – | वानराणां। |
| **सौमित्रेरपि** | – | सुमित्रायाः पुत्रः लक्ष्मणः तस्य अपि (लक्ष्मण के भी)। |
| **पत्रिणाम्** | – | बाणानाम्। |
| **अनुजानीहि** | – | आज्ञापयतु। |
| **आश्लिष्य** | – | आलिंग्य। |
| **हिरण्यमयी** | – | स्वर्णमयी (स्वर्ण से निर्मित)। |
| **उत्खातितम्** | – | दूरीकृतम् (काँटा निकाल दिया है)। |
| **शल्यम्** | – | कण्टकम्। |
| **व्यतिकरो** | – | समागमः। |
| **प्रसादः** | – | अनुग्रहः। |

# अभ्यासः

## वस्तुनिष्ठ-प्रश्नाः –

१. तमसा, मुरला च का स्तः ?

(क) लताद्वयम् (ख) पात्रद्वयम्

(ग) नदीद्वयम् (घ) सखिद्वयम् ( )

२. परित्यागोपरान्तः सीता आत्मानं कुत्र निक्षिप्तवती ?

(क) गोदावरीप्रवाहे (ख) गंगाप्रवाहे

(ग) रसातले (घ) वाल्मीकि-आश्रमे ( )

३. छायारूपिणी सीता रामं कुत्र अमिलत् ?

(क) दण्डकारण्ये (ख) जनस्थाने

(ग) पञ्चवटीवने (घ) आश्रमे ( )

४. सीता कस्य प्रसादात् अदृश्याऽभवत् ?

(क) लोपामुद्राप्रसादात् (ख) तमसाप्रसादात्

(ग) वनदेवताप्रसादात् (घ) भगीरथीप्रसादात् ( )

## अतिलघूत्तरात्मक-प्रश्नाः

प्र.१. विदेहराजपुत्री का आसीत् ?

प्र.२. सीतायाः पुत्रयोः किम् अभिधानम् ?

प्र.३. रामस्य अश्वमेध-सहधर्मचारिणी का आसीत् ?

प्र.४. स्तन्यत्यागोपरान्तं सीतायाः दारकद्वयं कुत्र नीतम् ?

प्र.५. 'कपीन्द्र' शब्दः कस्य कृते प्रयुक्तः ?

## लघूत्तरात्मक-प्रश्नाः –

प्र.१. गोदावरीह्रदात् आगच्छती सीता कीदृशी आासीत् ?

प्र.२. रामाय सीतायाः स्पर्शः कीदृशः आसीत् ?

प्र.३. तमसा सीतां कुत्र अनयत् ?

प्र.४. रामचन्द्रेण कृतानि सीतायाः सम्बोधननामानि लिखत ।

## निबन्धात्मक-प्रश्नाः –

प्र.१. रामानुसारेण सीताायाः प्राप्ति विषये के के व्यर्थाः अभवन् ?

प्र.२. अस्मिन् पाठे करुणरसस्य विश्लेषणं कुरुत ।

प्र.३. 'छायाङ्क' इति नामस्य सार्थकतां प्रतिपादयतु।

## व्याकरणात्मक-प्रश्नाः –

१. **अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + इति | = | ........................... | ......................... |
| (ख) | सन्निपत्य + अभियुक्तः | = | ........................... | ......................... |
| (ग) | कुतो +नु + एष | = | ........................... | ......................... |
| (घ) | निः + अनुक्रोशा | = | ........................... | ......................... |
| (ङ) | आर्यपुत्रस्य + उल्लापाः | = | ........................... | ......................... |

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः –**

| | सन्धिपदम् | | विग्रहः | सन्धिनाम |
|---|---|---|---|---|
| (क) | सम्भ्रान्तेव | = | ........................... | ......................... |
| (ख) | खल्वेतत् | = | ........................... | ......................... |
| (ग) | तत्रैष | = | ........................... | ......................... |
| (घ) | वर्धितोऽभूत् | = | ........................... | ......................... |
| (ङ) | प्रागावृणोति | = | ........................... | ......................... |

३. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः –**

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | घनव्यथः | = | .................................... | ........................... |
| (ख) | विश्वकर्मतनयः | = | .................................... | ........................... |
| (ग) | जगत्पतिम् | = | .................................... | ........................... |
| (घ) | दीर्घशोकः | = | .................................... | ........................... |
| (ङ) | कपीन्द्रसख्यम् | = | .................................... | ........................... |

४. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत –**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | रामभद्रेण | .................. | .................... | ................... |
| (ख) | भगवतीभ्याम् | .................. | .................... | ................... |
| (ग) | त्रैलोक्यस्य | .................. | .................... | ................... |

| | | | | |
|---|---|---|---|---|
| (घ) | मनसः | .................. | .................... | ................... |
| (घ) | वध्वा | .................. | .................... | ................... |
| (ङ) | माम् | .................. | .................... | ................... |

५. **निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनं च पृथक् निर्दिश्यताम् -**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | करोमि | ................ | .............. | ............. | ................. |
| (ख) | अस्ति | ................ | .............. | ............. | ................. |
| (ग) | आज्ञापयति | ................ | .............. | ............. | ................. |
| (घ) | ग्लपयति | ................ | .............. | ............. | ................. |
| (ङ) | भविष्यामि | ................ | .............. | ............. | ................. |
| (च) | गच्छाव: | ................ | .............. | ............. | ................. |

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक्-पृथक् लिख्यताम् -**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | भवितव्यम् | ....................... | ....................... |
| (ख) | स्पृश्यमानः | ....................... | ....................... |
| (ग) | नीता | ....................... | ....................... |
| (घ) | सम्पादयितुम् | ....................... | ....................... |
| (ङ) | परिहृत्य | ....................... | ....................... |
| (च) | निक्षिप्तवती | ....................... | ....................... |

## उत्तरमाला

वस्तुनिष्ठात्मक-प्रश्नाः १. (ख) २. (घ) ३. (ग) ४. (क)

❀ ❀ ❀